वशिका, स्त्री, (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति। वश्+ठन्।) अगुरुः। इति शब्द-चन्द्रिका ॥

वशिता, स्त्री, (वशिनो भावः। वशिन्+तल्।) वशित्वम्। इति हेमचन्द्रः ॥ (यथा, भागवते। ११। १५। ३६।
“नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते।
मनो मय्यादधद्योगी मद्धर्म्मा वशितामियात् ॥”)

वशित्वं, क्ली, (वशिनो भावः। वशिन्+त्व।) आयत्तत्वम्। (यथा, पञ्चतन्त्रे। १।
“शास्त्रं सुचिन्तितमपि प्रतिचिन्तनीय-
माराधितोऽपि नृपतिः परिशङ्कनीयः।
अङ्के स्थितापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥”)
शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। यथा,—
“अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ॥”
वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति इत्यमर-टीकायां भरतः ॥

वशिनी, स्त्री, (वशो वशीकरणं साध्यत्वेनास्त्यस्या इति। वश्+इनिः। ङीप्।) वन्दा। शमी-वृक्षः। इति शब्दरत्नावली ॥

वशिरं, क्ली, (उश्यते इष्यते इति। वश+बाहु-लकात् किरच्। यद्वा, वशिं वशत्वं रातीति। रा+कः।) सामुद्रलवणम्। इत्यमरः ॥

वशिरः, पुं, (वश+किरच्।) गजपिप्पली। इत्यमरः ॥ (अस्य पर्य्यायो यथा,—
“करिपिप्पली करणा कपिवल्ली कपिल्लिका।
श्रेयसी वशिरश्चापि गजाह्वा गजपिप्पली ॥”
सुचिटा इति ख्यातः। अस्य पर्य्यायो यथा,—
“पार्व्वतेयश्च करभो वशिरः कपिपिप्पली।
चामातासौ क्वचित्प्रोक्तः सूर्य्यावर्त्तः सितोऽपरः ॥”
इति वैद्यकरत्नमाला ॥)
चव्यम्। इति राजनिर्घण्टः ॥ अपामार्गः। इति मेदिनी। रे, २०८ ॥ वचा। इति शब्दचन्द्रिका ॥

वशिष्ठः, पुं, (वशवतां वशिनां श्रेष्ठः। वशवत्+इष्ठन्। “विन्मतोर्लुक्।” ५।३।६५। इति लुक्।) यद्वा, वरिष्ठः। पृषोदरादित्वात् साधुः। अस्य निरुक्तिर्यथा, महाभारते। १३। ९३। ८९।
“वशिष्ठोऽस्मि वरिष्ठोऽस्मि वशे वासगृहेष्वपि।
वशिष्ठत्वाच्च वासाच्च वशिष्ठ इति विद्धि माम् ॥”)
स्वनामख्यातमुनिः। तत्पर्य्यायः। अरुन्धती-जानिः २। इति हेमचन्द्रः ॥ अरुन्धतीनाथः ३ वाशिष्ठः ४। इति शब्दरत्नावली ॥ स तु ब्रह्मणः प्राणेभ्यो जातः। तस्य भार्य्या कर्द्दमकन्या अरु-न्धती। पुत्राः सप्तर्षयः। इति श्रीभागवतमतम् ॥ अपि च।
“वशिष्ठश्च तथोर्ज्जायां सप्त पुत्रानजीजनत्।
कन्याञ्च पुण्डरीकाक्षां सर्व्वशोभासमन्विताम् ॥
रजो गात्रोर्द्ध्वबाहुश्च सवनश्चानघस्तथा।
सुतपाः शुक्र इत्येते सप्त पुत्रा महौजसः।
सर्व्वे तपस्विनः प्रोक्ताः सर्व्वे यज्ञेषु भागिनः।
अयज्वानश्च यज्वानः पितरो ब्रह्मणः सुताः ॥”
इति कौर्म्मे १२ अध्यायः ॥
मित्रावरुणयोः पुत्रः। यथा,—
“इति पृष्टा नरेन्द्रेण कथ्यतामिति भूपते।
वशिष्ठं चोदयामासुः समस्तास्ते तपोधनाः ॥
मुनिभिः प्रेरितः सोऽपि यथावद्यतमानसः।
योगमास्थाय सुचिरं मैत्रावरुणिरात्मवान् ॥”
अन्यच्च।
“मित्रावरुणयोश्चैव कुम्भिनो ये परिश्रुताः।
एकार्णयास्तथैवान्ये वशिष्ठा नाम विश्रुताः ॥
एते पञ्च वशिष्ठानां स्मृता श्लोकादशैव तु।
अष्टावेते समाख्याता ब्रह्मणो मानसाः सुताः ॥”
इति वह्निपुराणे घृतधेनुविधिवाराहप्रादुर्भावा-ध्यायौ ॥

वशीकरणं, क्ली, (वश+कृ+भावे ल्युट्। अभूत-तद्भावे च्विः।) मणिमन्त्रौषधैरायत्तीकरणम्। इति भरतजटाधरौ ॥ अस्य पर्य्यायः वशक्रिया-शब्दे द्रष्टव्यः ॥ * ॥ तत्साधनौषधानि यथा,—
“ब्रह्मदण्डी वचा कुष्ठं प्रियङ्गुनागकेशरम्।
दद्यात्ताम्बूलसंयुक्तं स्त्रीणां मन्त्रेण तद्वशम् ॥”
ॐ नारायणाय स्वाहेति।
“ताम्बूलं दीयते यस्य स वशी स्यान्न संशयः।”
ॐ हरि हरि स्वाहा ॥ १ ॥
“गोदन्तं हरितालञ्च संयुक्तं काकजिह्वया।
चूर्णं कृत्वा यस्य शिरे दीयते स वशी भवेत् ॥ २ ॥
खञ्जरीटस्य मांसन्तु मधुना सह पेषयेत्।
ऋतुकाले योनिलेपात् पुरुषो दासतामियात् ॥ ३ ॥
अगुरुं गुग्गुलुञ्चैव नीलोत्पलसमन्वितम्।
गुडेन धूपयित्वा तु राजद्वारे प्रियो भवेत् ॥ ४ ॥
श्वेतापराजितामूलं पिष्टं रोचनया युतम्।
यं पश्येत्तिलकेनैव वशीकुर्य्यान् नृपालये ॥ ५ ॥
काकजिह्वा वचा कुष्ठं निम्बपत्रं सकुङ्कुमम्।
आत्मरक्तं सभावेयं वशी भवति मानवः ॥ ६ ॥
ॐ नमः सर्व्वसत्त्वेभ्यो नमः। सिद्धिं कुरु कुरु स्वाहा।
सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम्।
स्त्रीणामग्रे भ्रामयेच्च पश्चाद्धे सा वशा भवेत् ॥ ७ ॥
ब्रह्मदण्डी वचा पत्रं मधुना सह पेषयेत्।
अङ्गलेपाच्च वनिता नान्यं भर्त्तारमिच्छति ॥ ८ ॥
मूलं जयन्त्या वक्त्रस्थं व्यवहारे जयप्रदम् ॥ ९ ॥
भृङ्गराजस्य मूलन्तु पिष्टं शुक्रेण संयुतम्।
अर्च्चिषी चाञ्जयित्वा तु वशीकुर्य्यान्नरं किल ॥ १०
अपराजिताशिफां दद्यान्नीलोत्पलसमन्विताम्।
ताम्बूलेन प्रदानाच्च वशीकरणमुत्तमम् ॥ ११ ॥
चतुःषष्टिकलाः प्रोक्ताः कामशास्त्रे वशीकराः।
आलिङ्गनाद्या नृस्त्रीणां कुमार्य्यादेर्व्वशीकराः ॥ १२ ॥
रोचनां नागपुष्पाणि विल्वपुष्पं प्रियङ्गवः।
कुङ्कुमं चन्दनञ्चैव तिलकेन जगद्वशे ॥ १३ ॥
दुरालभा वचा कुष्ठं कुङ्कुमञ्च शतावरी।
तिलतैलेन संयुक्तं योनिलेपात् वशो नरः ॥ १४ ॥
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियः।
सुभगा स्यात् सा च रुद्र पतिर्दासो भविष्यति ॥ १५ ॥
माहिषं नवनीतञ्च कुष्ठञ्च मधुयष्टिका।
सौभाग्यं भगलेपात् स्यात् पतिर्दासो भवेत्तदा ॥ १६ ॥
पञ्च रक्तानि पुष्पाणि पृथग्जात्या समाहरेत्।
कुङ्कुमेन समायुक्तमात्मरक्तसमन्वितम् ॥
पुष्पेण तु स पिष्ट्वा च रोचनायां समेकतः।
स्त्रिया पुंसा कृतो रुद्र तिलकोऽयं वशीकरः ॥ १७ ॥
ब्रह्मदण्डी तु पुष्पेण याने पाने वशीकरः ॥ १८ ॥
ॐ गं गणपतये स्वाहेति।
अयं गणपतेर्मन्त्रो धनविद्याप्रदायकः ॥
इममष्टसहस्रञ्च जप्त्वा बद्ध्वा शिखां ततः।
व्यवहारे जयः स्याच्च शतजाप्यान्नृणां प्रियः ॥ १९ ॥
तिलानान्तु घृताक्तानां कृष्णानां रुद्र होमयेत्।
अष्टोत्तरसहस्रन्तु राजा वश्यस्त्रिभिर्द्दिनैः ॥ २० ॥
ह्रींकारं सविसर्गञ्च प्रातःसूर्य्यसमद्युतिम्।
स्त्रीणां ललाटे विन्यस्य वश्यतां नयति ध्रुवम् ॥ २१ ॥
यस्तु जुहुयादयुतं शुचिः प्रयतमानसः।
दृष्टिमात्रे सदा तस्य वशमायान्ति योषितः ॥ २२ ॥
मनःशिला पत्रकञ्च सगोरोचनकुङ्कुमम्।
एभिः कृते च तिलके सदा स्त्री वश्यतामियात् ॥ २३ ॥
सहदेवी भृङ्गराजः सितापराजिता वचा।
तेनैव तिलकं कृत्वा त्रैलोक्यं वश्यतामियात् ॥ २४
गोरोचना मीनपित्तमाभ्याञ्च कृतवर्त्तिकाम्।
यः पुमांस्तिलकं कुर्य्याद्वामहस्तकनिष्ठया।
स करोति वशं सर्व्वं त्रैलोक्यं नात्र संशयः ॥ २५ ॥
गोरोचना महादेव ऋतुशोणितभाविता।
ततः कृताच्च तिलकान्मानवं यं निरीक्षते।
तच्च सर्व्वं वशं कुर्य्यान्नात्र कार्य्या विचारणा ॥ २६ ॥
नागेश्वरञ्च शैलेयं त्वक् पत्रञ्च हरीतकी।
चन्दनं काष्ठकृष्णैला रक्तशालिसमन्विता।
एतैर्धूपो वशकरः स्मरवाण इवेश्वर ॥ २७ ॥
रतिकाले महादेव पार्व्वतीप्रिय शङ्कर।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्।
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः प्रियः ॥ २८ ॥
सैन्धवञ्च महादेव पारावतमलं मधु।
एभिर्लिप्तन्तु लिङ्गं वै कामिनीवशकृद्भवेत् ॥ २९ ॥
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च।
तण्डुलञ्च प्रियङ्गुञ्च पेषयेदेकयोगतः।
अनेन लिप्तलिङ्गस्य कामिनी वश्यतामियात् ॥” ३० ॥
इति गारुडे १८३। १८६। १८९ अध्यायाः ॥
“अथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम्।